ISSN - 2231-1130
वर्ष–षष्ठम् ; सितम्बर–2015


# मार्कण्डेयपुराणे अनुलेपविद्या

बुद्धदेव घोषः*

पुरति अग्रे गच्छतीति पुरा। पुरा पुरतनम् अनीति जीवयति बोधयति इति पुराणं ग्रन्थविशेषः, पुराण पूर्वकात् आदादिकात् अण् प्राणने इति धातोरचि णन्वे च कृते पुराण शब्दो निष्पद्यते।

पुरा अतीताद् अर्थात् अणति कथयति इति व्युद्पत्तौ पुरा उपपदाद् भौवादिकाद् अण् शब्दे इति धातोः पचादित्वाद् अचि प्रत्यये सति पुराण शब्दः सिध्यति।

आचार्य यास्केन उक्तम् –

''पुरा नवं भवति';'' ।(नि.3.19)

मद्स्य पुराणे उद्धृतम् अस्ति –

''पुरातनस्य कल्पस्य पुराणानि विर्दुवूर्धाः'' ।।(53.71)

सृष्टेः आरम्भकालतः प्रलयपर्यन्तं समस्तस्य विश्बस्य क्रमवद्धोहासनिर्देशकानां भारतीयसंस्कृतेः प्रतीकानां वैदिकस्य च धर्मस्य परम्परायाश्च परिपोषकाणां सर्वविषयपरिपूर्णानामष्टादशानं महापुराणां परिचयप्रसङ्.गे महर्षिणाव्यासदेवेन विष्णपुराणे पुराणानां नामक्रमश्चेवंविधः प्रोक्तोअस्ति –

ब्राह्मं पाद्मं वैष्णवश्च शैवं भागवतं तथा।
तथान्यन्तारदीयं च मार्कण्डेयं च सप्तमम्।।
आग्रेयमष्टम् चैव भविष्यं नवमं तथ।
दशमं ब्रह्मवैवतं लैड्.गमेकादशं स्मृतम्।।
वाराहं द्वादशं चैव स्कान्दं चात्र त्रयोदशम्।
चतुर्दशं वामनकं कौमं पंचदशं तथा।।

---

* एम0फिल्0 गवेषकल, संस्कृत, पालि एवं प्राकृत विभाग, विश्वभारती शान्तिनिकेतन, पश्चिमबंगाल

मा‌द्स्यं च गारूडं चैव ब्रह्माण्डश्च ततः परम्।
महापुराणान्येतानि अष्टादश महामुने।।

(मद्सयपुराण – 3.6.21–24)

मार्कण्डेयपुरोणं पुराणगणनायां सप्तमं विर्भति, परन्तु देवीभागवतानुसारमिदं द्वितियं पुराणमस्ति। मद्स्यपुराणानुसारं पक्षिण उद्दिश्य धर्मपालकै मुनिभिः प्रश्ने कृते यत्र मार्कण्डेयेन मुनिना सविस्तरं धर्मार्थादीनां समस्य् प्रतिपादनं कृतमस्ति तदेवास्ति मार्कण्डेयपुराणं यस्य श्लोकसंख्या नवसहस्राणि सन्ति –

यत्राधिकृत्य शकुनीन् धर्मान् धर्माविचक्षणाः।
व्याख्याता वै मुनिप्रश्ने मुनिभिधर्मचारिभिः।।
मार्कण्डेयेन कथितं तद्सर्वं विस्तरेण तु।
पुराणं नव साहस्रं मार्कण्डेयमिहोच्यते।। (53.25.26)

नारदीयपुराणे मार्कण्डेयपुराणस्य परिचयप्रसड्.गे उक्तमस्ति यद् यत्र मार्कण्डेयमुनिना महर्षि जैमिनिं प्रति प्रथमं सर्वेषाधर्माणां प्रतिपादनं कृतमस्ति तदस्ति मार्कण्डेयपुराणम् –

अथातः संप्रवक्ष्यामि मार्कण्डेयामिधं मुने।
मार्कण्डेयेन मुनिना जैमिनेः प्राक् समीरितम्।।(ना.पु.–98.1)

शिवपुराणस्यात्तरखण्डे लिखितमस्ति यत् यस्सिन् पुराणे महामुनेः वक्ता जातः तद् सप्तमं मार्कण्डेयपुराणमस्ति –

यत्र वक्ताहभवत् खण्डे मार्कण्डेयो महामुनिः।
मार्कण्डेयपुराणं हि तदाख्यातं च सप्तमम्।।

एवं नारदिय–मद्स्य–शिव पुराणेषु यद् मार्कण्डेयपुराणस्य लक्षणमुक्तमस्ति, तत् प्रचलित मार्कण्डेयपुराणे पूर्णरूपेण प्रप्यते।

मद्स्य–नारद–ब्रह्मवैवत–श्रीमद्भागवतानुसारमत्र 9000 श्लोक

भवितुमर्हति, किन्तुपलब्धे तद्पुराणे 2100 श्लोका न्युनाः सन्ति। केवलमत्र 6900 श्लोक उपलभ्यन्ते, यत्र 137 अध्यायाः सन्ति। मुद्रितं मार्कण्डेयपुराणं नरिष्यन्तचरित्रे एव समाप्तिमेति, परनतु नारदीयपुराणस्य सूच्यनुसारमिदं पुराणमिक्ष्वाकोः कुशपर्यन्तं पुरूखसः श्रीकृष्णचरित्रं यावत् सम्यग् वर्णयित्वा समाप्तं भवितुमर्हति। अतो निश्चीयते यदस्यान्तिमो भागा नुनं लुप्तो अस्ति। तथापि सर्वे समालोचका मन्यते यदस्य पुराणस्य प्राप्तोअंशो यथातथैवास्ति। लोकप्रसिद्धा दुर्गासप्तशती अस्यैव पुराणस्यैको महत्वपूर्णो अंशो विद्यते। मार्कण्डेयपुराणस्य 81–93 अध्यायपर्यन्तं 13 अध्याया दुर्गासप्तशतीनाम्रा पृथक् प्रकशितं वर्तते सर्वत्र चोपलभ्यते।

पुराणोष्वाख्यानानां प्रसड्.गे आश्चार्यकारिणीनामनेकासामेवम्विधानां विद्यानामुल्लेखो विद्यते, या आकर्ण्य सहसा चित्तं चमद्कृतं भवति प्रसीदति च मनोनिरन्तरम्। अधुना एकः प्रश्नः 'विद्या' किम्? ज्ञानार्थक 'विद्' धातोःसिदध्यति विद्या शब्दः। सांसारिकपदार्थस्य अध्यात्मिक–तथ्यस्य च सम्यग् ज्ञानं विद्यारूपेण कथ्यते। विद्या शब्दः ज्ञानस्य अपरं नाम। वेद्यते अनया इति विद्या इति विग्रहे ज्ञानार्थकाद् विद् धातोः विष्पन्नः विद्या शब्दः स्वगौरवं प्रकटयति। अस्मिन् असारे संसारे वहुनि वस्तुनि विद्यन्ते, किन्तु यादृक् विद्यायाः सर्वविध–वैशिष्टयं वर्तते न तादृगन्यस्य वस्तुनः। किं सत् किमसत् इति ज्ञानं विद्यया एव सर्वै ज्ञानन्ति यत् कः धर्मः, कः अधर्मः, कः अधर्मः, किं पापं किं सत् किमसत् इति ज्ञानं विद्यया एव जायते। विद्यया एव मनुष्याणाम् अज्ञानं नश्यति ज्ञानं च प्रस्फुटति। अनया एव सर्वै ज्ञानन्ति यत् कः धर्मः, कः अधर्मः, किं पापं किं पुन्यमिति। अखिलोहपि ब्रह्मण्डे ईदृशी कापि वस्तुः नास्ति यत् विद्ययाः समानतां करोतु। वस्तुतः विद्यानिकषापाषाणमेव तद्वस्तु येन मानवस्य पशोः च भेदं कर्तुं शक्यते। अतः नीतिशतकारेण भर्तृहरिणा – ''विद्याविहीनः पशुः'' इति सुपष्टमेव विद्या वैशिष्ट्यं प्रतिपादितम्।

परा–अपरा इति प्रकारेण सा विद्या द्विविधा वर्तते। तत्र च परा विद्या ब्रह्मविद्येति निगद्यते। लोके अस्मिन् प्रायः सर्व एव विद्वांसः कामयन्ते यत्

कथमपि मोक्षप्राप्ति भवेद् । भगवती श्रुतिः – 'ऋते ज्ञानान्न मुक्तिः' इति प्रकोरण ज्ञानस्य एव मोक्षोपायतां वदति। विद्या एव संसार–दावानल–दग्धस्य जन्ममरणप्रवाहपतितस्य मनुष्यस्य कृते मोक्षदायिनी वर्तते। तथा च – सा विद्या या विमुक्तये' इति सूक्तिः विदुषां मनसि समुल्लसति। 'विद्याया अमृतमश्नुते' इति श्रुतिवाक्यमपि। विद्याया एव अमृतपदवाच्यस्य मोक्षस्य प्राप्तिः भवति च इति सूचयति।

द्वितीया च सांसारिकी विद्या अपरा विद्या इति शास्त्रेषु सुपदिष्टा। वर्तमानशताव्दयाः उत्तरार्द्धे अन्या विद्यया द्रुततरं करमोन्नतिरवाप्ता। अतो निश्चितमिदं यत् कल्पनातीतां समुन्नतिं समाश्रिता साम्प्रतम् एषा भौतिकी विज्ञान–विद्या, किन्तु एषा विज्ञान–विद्या यदा लोकोपकारिणी भवति। अपराविद्यासु अर्थात् अलौकिकविद्यासु मध्ये मार्कण्डेयपुराणे वर्णिता अनुलेपनविद्या, पद्मिनीविद्या अन्यतमा भवति।

तत्र अनुलेपनम् इति शब्दे अनु तु अव्ययम्। यस्यार्थस्तु एवम् – पश्चात्, सदृशम्, अधीनम्, निकृष्टम्, अंशः, समीपम् इति। एवं अनुलेप इति पुंलिङ्गवाचकः, अनुलेपनन्तु इति क्लीवलिङ्गवाचकः।

मार्कण्डेयपुराणे एकस्यैवम्विधस्य विशिष्टस्य पादलेपस्य सङ्कतो वर्तते, यस्य पायोर्लेपाद् मनुष्यस्य गतिरप्रतिहता जायते, दिनार्द्धे एव सहस्रयोजनयात्रायाः सामर्थ्यमागच्छति। तत्प्रयोक्तुरेकस्य मन्त्रौषधिविदो ब्रह्मणातिथेः चर्चा विद्यते, येनैकस्मै वेदवेदाङ्गपारगायाग्रिहोत्रिणो ब्राह्मणाय पादलेपं प्रदाय प्रोक्तम् –

मन्त्रौषधि प्रभावेण विप्राप्रतिहता गतिः।
योजनानां सहस्रं हि दिनार्द्धेनं बजामयहम्।।(म.पु.–61.12)

ततो जातकौतुकः सः दिनस्य पूर्वार्द्धेन परावर्तिष्ये इति मनसि निश्चित्य कृतनित्यक्रियो हिमालयं द्रष्टुकामनया प्रातस्तमनुलेपं पादयोरनुलिप्त तत्प्रभावेण तत्रोपस्थितः। तत्र मध्याह्ने दिनकरकिरणसन्तप्ते। हिमे भ्रमतस्तस्य पादलेपो विलीनः, येन सहस्रयोजनगमनशक्तिर्विनष्टा –

पादाक्रान्तेन तस्याथ तुहिनेन विलीयता।

प्रथालितः पादलेपः परमौषधिसम्भवः।।(मा.पु.–61.19)

तदनू विभ्रष्टपादलेपो जडमतिः स ब्रह्मणः सायंकालीनक्रियालोपात् चिन्तयामास –

यदि प्रलेपो नष्टो मे विलीनो हिमवरिणा।
शैलेअतिदुर्गमश्चायं दूरश्चाहमुपागत।।

प्रयास्यामि क्रिया हानिमग्निशुश्रूषणादिकम्।

कथमत्र करिष्यामि सङ्कटं महादागतम्।।

(मा.पु.–62.28,29)

परमं वैक्लव्यमुपगतः स गार्हपत्यमस्ति संस्तुत्य तत्कृपया स्वगृहमुपेत्य विधिवत् सायंतनं कृत्यं सम्पादयामास –

ततः क्षणोनेव तदा निजगेहमवाप्य सः।

यथा प्रोक्तं द्विजजेष्ठश्चकार सफलाः क्रियाः।।(मा.पु.–61.1)

गीतायामपि अनुलेपविद्यायाः उल्लेखः विद्यते। यथा – विश्बरूपर्दशनम् इति एकादशाध्याये संजयेन उक्तम् – दिव्यमाल्यम्वरधरं दिव्यगन्धानुलेपनम्।

सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्।।(गीता–11.11)

अत्र संजयेन भगवतः श्रीकृष्णस्य रुपस्य वर्णना क्रियते। तत्र भगवान् बहुः आननचक्षुयुक्तः, अद्भुतदर्शनविशिष्टः, दिव्याभरणभुषितः, दिव्यमाल्यवस्त्रशोभितः, दिव्यन्धेनानुलिप्तः, आश्चर्यमयम् उज्ज्बलं सर्वत्रमुखविशिष्टरूपयुक्तः भवति।

अमरकोशेहपि अनुलेपनविषये उक्तम् – फलहेमशुल्बलोहसुसदुःस–शुभाशुभम्।

जलपुष्पाणि लवणं व्यंजनानयनुलेपनम्।।

(लिंगादिसंग्रहवर्गः, 23)

एतद्विषये अमरविवेकटीकायाम् सम्यक् व्याख्या कृता एवम् – फलं फलमात्रं कपित्थमित्यादि। हलमित्यपि क्वचित्पाठः। हेम सुवर्णं कनकमित्यादि। शुल्वं ताम्रमित्यादि। शुल्वं ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ इति मेदिनी। लोहं कालायसमित्यादि। सुखं शर्म शातमित्यादि। दुःखं तु कृच्छ्रं कष्टम्। शुभं कल्याणं कुशनमित्यादि। अशुभमकल्याणमित्यादि। जलपुष्पाणि। कुमुदकमलकह्लारोत्पला– दीनी। लवणं सैन्धवमित्यादि। व्यंजनविशेषाणामपि दधितक्रादीनां ग्रहणम्। अनुलेपनं कुङ्कुमादि। अत्र वाधितादन्यत् इति किम्। आकाशो विहाया द्यौः। अटवी अरण्यानीत्यादिकम् एवमन्यदप्यूह्यम्।

अतः मार्कण्डेयपुरणे वर्णितस्याः। अनुलेपनविद्यायाः प्रासङ्गिकतायाः समर्थनम् प्रसिद्धग्रन्थेषु अपि विद्यते। अपि च इयं विद्या वर्तमाने अपि भिन्नरूपेण प्रसिद्धा।

**सहायक ग्रन्थपंजी –**


1. डा. श्रृकृष्णमणि त्रिपाठी, पुराणपर्यालोचनम्–1, 2, चौखम्बा सुरभारती प्रकाशन, 2012
2. आचार्य वलदेव उपाध्याय, पुराण विमर्श, चौखम्बा सुरभारती प्रकाशन, 2013
3. संस्कृत साहित्येर इतिहास, वन्ध्योपाध्याय धीरेन्द्रनाथ, कलकाता, प.ब.रा. पु,2य 2009
4. तर्करत्न पंचानन, मार्कण्डेय पुराण, नवभारत प्र., वाला, कलकाता, 1390
5. शुक्ल आचार्य वदरिनाथ, मार्कण्डेय पुराण एक अध्ययन, चौखम्बा सुरभारती प्रकाशन, वारानसी, 2003
6. तर्करत्न पंचानन, मद्स्य पुराण, नवभारत प्र., वांला, कलकाता, 1437
7. तर्करत्न पंचानन, नारदीय पुराण, नवभारत प्र., वांला कलकाता

**8.** श्रीमद्भगवद् गीता, श्रील विश्बनाथ चक्रवर्त्ती ठाकुर, सारार्थवर्षिणी टीका, त्रिदण्डिभिक्षुभक्तिविवुध वोधायन,–1म 1998.3य 2015–09–14

**9.** अमरकोशः,आर.एस.तालेकार, EBL, DELHI, 1882, 2002